मुक्तत्वान्नन्नावर्णाश्रयेनास्तिप्रत्ययलक्षणमित्येतद्वर्णप्राधान्येएवप्रवर्ततइत्याकरग्रंथानान
पदपमीर्[illegible]त्रजभ्रव्वाग्रगणयाचःपरस्मिन्निनिस्त्रेकौस्तुभेनथैवाभ्युपगमाच्चानस्माद्दत्तवस्त्याम
त्यादिप्रग्र निप्रत्युदाहार्यस्वादिष्विनिपदत्वस्यतत्रसत्वात्तद्विर्वचनेसुधुपास्यः।वरो।वरेयोजादेशः।स्थानस्थानि
हके।७ वदित्यर्थः।सहविवक्षाभावेपिनिपातनांद्वंद्वःसप्तम्यलुक्कापायापावरः।पश्चयपडड्निवरच्यल्लोपय राम
लोपोनयानोलोपपूर्विचेत्यालोपेकार्यंऽल्लोपोनस्थानिवत्तायलोपोयायेपीपतेः।क्विपिये।ग्रिः।नत्रहिनिमेत्रे ४५

अल्लोपोऽद्वित्यादिसिद्धये५

तीङ्भावे ल्लोपयलोपयोः सतोरल्लोपस्य स्थानिवद्भावे सत्येरनेकाच इति यणि यलोप स्तत्र कार्ये ल्लो
पो न स्थानिवत्। यत्तु कंडूयतेः क्विप् कंडूरिति तिह न्तिकारात्रेऽङ् नन्नात्प्रत्ययेन क्विनो बाधस्य
दुर्वारत्वात् कंडूयावल्लूपेन्ये वम्भवितव्यमिति भाष्यविरोधाच्च स्वरदीर्घयलोपेषु लोपाजादेश एव न
स्थानिवत्। तेन वाय्वोरध्वर्य्वोरित्यत्र वलि लोपो न। स्वरे चिकीर्षकः इह च न निषेधः। पंचारत्नी
दशारत्नयः स्थानिवत्त्वेन इगंते द्विगौ परितः पूर्वपदप्रकृतिस्वरः सिध्यति। सवर्णानुस्वारयोः। पिठ्ठ
। पिंषंति। इह श्नसोरल्लोपो न स्थानिवत्। ननु परसवर्णे कर्तव्येऽनुस्वारस्य स्थान्यचः पूर्वत्वाभावात्स्था
निवद्भावस्यैवाप्राप्त्या व्यर्थोयं निषेध इति चेन्न। स्थानिद्वारा पिपूर्वत्वस्याभ्युपगमात्। न चैवं विनि
यपनीत्यत्र गुकोऽप्रसंगः सत्रात्पूर्वकरीत्या स्थानिवत्त्वस्य दुर्वारत्वादिति वाच्यं स्थानिद्वारकपूर्वत्वस्या
नित्यत्वाभ्युपगमात् दीर्घे प्रतिदीव्ना। न चेहाचः परस्मिन्निति स्थानिवत्वेपि आदेशप्रयुक्तकार्यस्या
निवारणात् दीर्घो भविष्यत्येवेति व्यर्थं दीर्घादिग्रहणमिति वाच्यं। आदेशप्रयुक्तकार्यं वाय्यनिड्न्यदीय्या

१ एतेन पूर्वत्रासिद्धेन स्थानिवदित्यवष्टम्भेन हत्यं दीर्घग्रहणं प्रत्याख्यातमिति नव्योक्तमपास्तम्। श्वोरागादिकानामव्युत्पन्नत्वे पि रिर्यतु विध्यतु रि
१ त्यादौ दीर्घस्य दुर्वारत्वात्। नवस्वरदीर्घत्वेत्यनेन पूर्वत्रासिद्धेन स्थानिवदितीदमेव नियम्यत इति वाच्यम्। तस्य पूर्वत्रासिद्धमित्येतस्य फलितो
१ र्थस्तदनुवादकत्वेन तन्नियम्यत्वायोगात्। न वैतत्सूत्रमेव तन्नियम्यम्। स्वरादिषु लोपाजादेशाए वेनासिद्धत्व सुप ५ गेमे

सि॰ र॰ सु ४६

46

नेनैव ज्ञापितत्वात्। तस्य च फलं प्रदयतीत्यादिसिद्धिरित्यवोचाम इह च न निषेधः। किर्योः गिर्योः। उशि
स ग्धि श्वमे। अद्नं। गिध्धः। अदेःक्ति निबद्धं। लं। ग्धं। दसीति घस्लादेशे घसि भसोर्हलीत्युपधालोपे झलो झ
लीति सलोपे झषस्तथोर्धोर्ध इति धत्वे घस्य जश्त्वेन गत्वं। न च अडभ्यवेकार्यत्वेपोलोपो न स्थानिवत्। बहुव्रीहौ
समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केष्विति समानस्य सः। चरिजत्तत्तनुः उ हत्तः। गमहनजनखनघसां
मुपधालोपश्च। र्त्वे कार्येन स्थानिवदिति सं। ह्यपि। अदर्शनादधिमथु इत्यादौ किं यो ऽदर्शनसत्वा
नुकुर्वीरन्नित्याशंक्याह। प्रसक्तस्येति। संयोगान्तस्याय दस्येत्यवधिकारादाहायमादमितिन दंतस्य
निःश्रतोन्त्यस्येत्यनेनेत्यर्थः। ननु येन विधिस्तदन्तस्येत्यनेनैव गतार्थत्वात्सौत्रमन्तग्रहणं सुत्यज
मिति येन्नाय थोद्देशेनस्यावरूपकत्वात्। केचित्तु कार्यकालनायाप्रत्येकं संयोगसंज्ञेति पक्षे संयोग
वेनोपस्थेनीद्दशविग्रहलाभार्थं तेन द घत्करोतीत्यत्र न संयोगान्तलोपः। स्याउश वस्कन्नस्क अन्त
ग्रहणास्त्रत्यजं सिद्धान्ते प्रत्येकं संयोगसंज्ञापक्षस्याश्रितत्वान्नत्युपराः प्रतिषेधः इति वचनमेवेदं। अथ

प्रसन्तनि
षेधापत्तेः।
नहि तेषु कर्त
व्यतुग्ग्रहणं दे
शाद्रत्रोपादे
रस्सिद्धत्वं प्रा
प्तम्। किंच
स्वरदीर्घत्व्य
पिनापूर्वम्
नपदान्ते स्व
रादेव प्राप्ते
तद्वत्थ्या सुप
राम गम्यते
४६

१ हृदीर्घग्रहणाभावे स्वरदीर्घत्येत्यत्र दीर्घग्रहणं कार्यम्। एवमपि निमेधानर्थ [illegible] क्य मिति दीर्घग्रहणप्रत्याख्यानं प्रतिदीव्न इत्यादौ
१ क्वचिदन्यथासिद्धिपरमिति वक्ष्यामः। नवतस्य दोषइत्यत्र दीर्घग्रहणान्निस्तारः। प्रतिदीव्न इत्यादाव [illegible] तिव्याप्तेरत्रैपादिकदीर्घार्थं तदिति तो
१ रा क्रान्तयिष्यमाणत्वाच्च। १

वावाच्यो व्याख्येय इत्यर्थः।सा च द्वेधा अन्तरस्तत्राज्झल इत्यपकृष्य संयोगांतस्य झलो लोप इत्येकाच्त्वेन रंगे
संयोगांतलोपे कर्त्तव्ये बहिरंगस्य परोऽसिद्धत्वादिन्य परा कार्यकालनापरमिदं। यथोद्देशाभिप्रायेणाघं
द्वयं नन्वारंभप्रत्याख्यानयोः फलभेदे कथं प्रत्याख्यानमिति चेत् न। तदभावात्। काव्यं कलत्रं चाव हा
हारी का व्यु कलत्र इत्येव भवति आद्यपक्षे द्वये लोपप्राप्तिविरहात्तदैकरूप्यात्पस्त्वं पूर्वमंतरंगपरपू
रं बहिरंगामित्याश्रयणीयमित्याकूः। यद्वैकाच इत्यत्र संयोगांतलोपं वदतां प्राचां मते रापं नाहि पिकठ्ठ
दुर्वारः। क्वौ विधिं प्रति नस्थानिवदित्युक्तेरितिदिक् परामाकूतमाहि न्या संयोगांतलोपस्यासिद्धत्वेनोष्ठ्यामे
ग नचैवमपि गिरिवेशमपनेर प्रत्यये वचनारंभपक्षे गिरिवेहून प्रत्याख्याने गिरिवेश्म इति रूपभेद
स्यास्य सत्वात् कथं फलभेदाभाव इति वाच्यं प्रामाणिकफलभेदस्यावश्यांगीकार्यत्वात्। यथोत्तरं मु
नीनां प्रामाण्यात्। कथं चिदप्येकरूप्यसंभवे वैरूप्यांगीकारस्यान्याय्यत्वात् इति पक्षद्वयेऽपि पक्ष
द्वयस्यापि भाष्यारूढत्वादिति भावः। चत्वारीति। नन्वपुनर्द्वित्वे एकधा त्रिधा एकपादि पं[illegible]त्रियं चेति

सि॰ स्तु एवंद्विधं त्रिधं चत्रिधेति प्राचीनरीत्यानवरूपाणीति रूपचतुष्टयोक्तिः कैस्तु यपघनामि चेन्नाए कंल ह्लणामे
४७ कस्मिन्नलहृपे सकृदेव प्रवर्त्तते इति न्यायेन पुनर्द्वित्वस्याप्रवृत्त्वात् द्वित्वपरं परायां रूपानेत्यस्य तु वीर
५७ त्वाच्चानचशरोझरि हलोयमामिति लोपेन सिद्धिः तस्यापि वह्यमाणादिशापाद्धिकत्वात् केचित्तु सर्व
त्रासिद्धीयमद्वित्वे इत्यनेन नञ्झ्वस्यासिद्धत्वाभावेद्धकारस्य व्यंतयनरत्वेन पुनर्द्वित्वप्रवृत्तौ बाधका
भावात् अत एव संप्यनेत्याद्यो परसवर्णाय काराद्द्वित्वं भाष्यकृतानामृत्सेन इत्यत्र टकारद्वित्वं भ
वतोदाहृतानास्सिद्धये च पूर्वत्रासिद्धीयमद्वित्वे इत्युपन्यस्ताहयेतु भवइत्याहावच्याष्टमिकद्वित्व
स्यस्थाने द्विवचनत्वात् स्थान्यादेशयोरभेदाद्धकारस्य पुनर्द्वित्वप्रवृत्तौ ह्रास्य भावादिति
वदंति तत्र दकारस्य व्यंतयतरत्वेनासतु पुनर्द्वित्वं पकारस्य पुनर्द्वित्वं तु न सम्यगिति प्रतिभाति तथा
ष्टमिकस्य स्थानेद्विवचनत्वे [illegible] स्त्रीषघ्नति संकायाः सर्वत्रासिद्धीयमित्युपन्यासवैयर्थ्यापत्तेः ॥ न च ध राम
कारविषये चरिताक्षितिमात्रकार्थितं तत्र तु नैउपन्यासश्चावचैयक इति वाच्यं [illegible] रूपाणि ४७

ध्र॰

८ वस्तुतस्तु शत्वस्यासिद्धत्वेपि न क्षतिः। धस्यैव पुनर्द्वित्वेपि वरूपस्य पक्षत्वेनेष्टसिद्धेः। नव्यानां तु पूर्वत्रासिद्धीयमिति मास्तु इत्येवं रूपचतुष्टयोक्त्या नुमीयते। अत एव षट् सन्तीत्युक्तं हृद्वनं हेतत् यतकारद्वित्वोक्तिरयुक्तेति चिन्त्याम॥ ८

स्यस्य पदुर्वारत्वात्। किंच दकारस्यापि किं स्थाने द्विर्वचनमुत द्वित्वप्रयोगो द्विर्वचनमिति। नाद्यः। रूपानेकत्व
स्योक्तत्वात्। न द्वितीयः। धकारेपि तथात्वापत्तेः। न च षकारस्थाने द्विर्वचनमेवाश्रीयत इति वाच्यम। मा
नाभावात्। अपि च सर्वस्य द्वे इत्यत्रैव पक्षद्वयेपि बाधकान्युपन्यस्य तत्परिहारपूर्वकं पक्षद्वयम
ङ्गीकृतं भाष्यकृता। अचो रहाभ्यामित्यादौ स्थाने द्विर्वचनत्वांगीकारे किं प्रमाणं। श्रुतिसा
म्यमिति चेत् लाघवात् द्वित्वप्रयोग एव न्याय्य इति दिक्। न चैवमपि चत्वारि रूपाणीति मूलोक्तमसंग
तमिति वाच्यम्। धकारद्वित्वमादाय तथोक्तत्वात्। अत एव दकारस्यापि द्वित्वे एकदं द्विधं एकधं
द्विदं द्विधं चेति। एवं द्विदं धकारसहितं द्विदं च द्विधेति षड्रूपाणि। तेषां सकारद्वित्वेन द्वादश। विस
र्गद्वित्वेन चतुर्विंशती रूपाणि भवन्ति द्विधमिति मूलं सर्वं गतार्थं। द्विपमिति। नन्विह द्वित्वमेव दुर्ल
भम्। अंतरंगे द्वित्वे कर्तव्ये पदद्वयाश्रितस्य परत्वाबहिरंगतया संयोगांतलोपस्यासिद्धत्वात्। किंच
धकारस्यापि द्वित्वे कर्तव्ये प्रत्यासिद्धत्वाज्झल्वचीति निषेधात् द्वित्वं दुर्लभमिति चेन्न। यथा हे शपद्वा

सि॰र॰स्व अयगान्।अन्यथादध्यत्रमध्वत्रेतिभाष्योदाहृतमसंगतंस्यात्।पद्मानरेपिअनचिचेतिद्वित्वं
४८ धकारस्यभवत्येवनाजानंतर्यइतिबहिरंगपरिभाषायानिषेधात्औत्तरकालिकेद्वित्वेअवकं
५४ २ पंस्यैत्यजानंतर्यसत्वात्।अत्रहरदत्ताचार्यैः।अंतरंगेवहिरंगेवाअचोरानंतर्यात्अयंपरोनाजा
नंतर्यइतिनिषेधप्रवृत्तिः।एवंचयकारद्वित्वविधतोमयइतिवार्तिकेजानंतर्याभावेपिपरविधोनत्स
त्वात्तत्रअहात्निरविहतेत्याहुः।तन्मतेसंयोगांतेत्यत्रत्यनवाबहिरंगलक्षणमन्वाह्वेतिभाष्यविरुद्धं
।किंचपचावेदमित्यत्रएनत्यैइत्यैत्वंकृतेनेत्याशंक्यबहिरंगपरिभाषयानेतिसमादधानस्यहरद
परस्य ४ त्तस्यैरविरुद्धमित्याहुः।वस्तुतस्तुतन्मतेनाजानंतर्यइत्यनित्या।बहिरंगलक्षणानत्वाह्वेतिवार्त्ति
कोक्तेः।अतएवयणोमयइत्यस्यदध्यत्रेत्युदाहृतंभाष्यकृता।किंचकैयटमतेपिअचोरानंतर्य
मित्यसंगतमेवयत्वंतुकोरासिद्धइतितन्मूलभूतज्ञापकविरोधात्।तस्माद्द्वित्वंतन्मतेप्यविवाह्वि राम
नमेवेतिदिक्।नचनमस्तुभ्यंपरिनिनिषेधात्कथमत्रयणोनिवार्यं।तस्यांगत्वेनाजादौत्वस्यएव ४८

नत्वप्रत्ययेनेः। नचैवमपिशाकलेनरूपांतरमपिकिंनस्यादितिवाच्यंसमासेतन्निषेधात्।नचनित्यस
मासएवसः।नित्यग्रहणस्यभाष्यकृताप्रत्याख्यातत्वात्।अतएववाप्यामश्वोवाप्यश्वइनघामानिनी
घानिरित्यत्रस्वश्वयेतिवासमासेशाकलंनेत्युक्तंषष्ठे।अतिर्वलोकापत्तुरीहतेचसप्रम्यर्थेहत्य
त्रकेप्यचहरदत्तकौस्तुभकृताव्याङ्गंवाप्यश्वइत्यादौसंज्ञायामितिसमासइतिनतत्र।संज्ञापांस
मासस्यनित्यत्वात्।सर्वैश्चत्तनथैवागोक्तत्वाच्च।नचैवमपिध्यायतेःसंप्रसारणेनसुधीश
ब्दस्यनिष्पन्नत्वात्संप्रसारणाच्चेतिपूर्वरूपापत्तिरितिवाच्यंसंप्रसारणापरत्वेसमानांगग्रह
णमितिवार्त्तिकानोधाःयंशाःइतिहृतकारस्यवैकल्पिकंद्वित्वंभवत्येवरेफस्यत्वन।अचोरहाभ्यामित्य
त्रद्वित्वनिमित्ततयासा[illegible]दाश्रितत्वेनकार्यित्वस्यबाधात्।नचैवंसुध्युपास्यइत्यत्रापियणस्या
त्सालोपिध्युपन्कार्यित्वेननिमित्तत्वस्यापिबाधसंभवादितिवाच्यं।वाप्यश्वपितृपसोपदिति
लिंगात्प्रवृत्तेनाहत्यबाधानंगीकारात्।अतएवनहिकार्यनिमित्तत्वेनाश्रीयतइत्यपिनाशंक्यं॥
पूर्वस्माद्धिधोस्थानिवद्भावात्संप्रसारणस्थानिकस्यात्तथात्वात्॥४

८।३

सि॰ ख॰
४६
५१

म २ ५४

लाहृतिरित्यत्र विसर्गमात्रस्य द्वित्वं नान्यस्याप्युक्तनस्कलरणस्तत्रस्थभाष्यविरोधाल्लाहृतिरित्यसाध्वि
तिगम्यश्चाङ्गेव ह्यां इति दिक् ॥ तत्पुरुषे वेति । आदित शब्दपरोस्य पुत्रशब्दस्तास्मिन्पुत्रशब्दस्य द्वित्वं नेत्य
र्थः । व्याहृत । नन्विदं व्यर्थमनचि चेत्यनेनैव याह्निकद्वित्वस्यासिद्धत्वादिति चेन्नैवं आक्रोश इत्य
नुवर्त्तनात्तत्रैव याह्निकं द्वित्वं न तु यथार्थकं न इति नियमार्थं वार्त्तिकस्यावश्यकत्वात् । अचो
० रहाभ्यां अनुकम्पराभ्यामिति । एतस्य पदशब्दाध्याहारो लभ्यते ननु तस्मादित्युत्तरस्येति परिभा
षया अनुवादे परिभाषाणामनुपस्थानादिति प्रक्रियाव्याख्यानात् अङ्गुणत्वानुवाद इत्यादेः कोऽर्थो
अभिप्रेतः अनुवादस्मात्रे इति अनूद्यमानविशेषणा इति अनूद्यमानविशेषणा विशेषणाद्यानि
वा नाधः इकोयणचीत्यादावपि तदनुपस्थितिप्रसंगात् । परिभाषारंभवैयर्थ्यापत्तेश्च । न द्विती
यः । प्रकृते तदनुपस्थितौ बाधकाभावात् अचइति हि अनूद्यमानविशेषणं न त्वनूद्यमानविशेष राम
णमिति नानन्तरीयमानाभावात् उदीचामातः स्थाने इति ज्ञापकविरोधाच्च तत्र ह्यनूद्यमानस्यात्र ४६

विशेषणांश

नोविशेषणाभावात् इति तथा चानूद्यमानविशेषणात् इति फलितत्वात् स्मृते च तदुपस्थितिर्नो बाधकाभा
वः। किंच मांड्श्च मित्यत्र यकारे तिप्रसंगो ऽदुर्वारः तस्मात् तस्मादित्युत्तरस्येत्यस्य न ये वेतत्सम्पत इतीन
न्वेवमपि रेफहकाराभ्यां परस्येत्यत्र कथं तदुपस्थितिः अनूद्यमानविशेषणत्वात् तयोः। एवं च ह
र्य्यनुभव इत्यादौ नकारभकारयोरतिप्रसंग इति चेन्न तस्मादित्युत्तरस्येत्यस्य वैयर्थ्यप्रसंगात् तान
हीह अविषयातिरिक्त [illegible] तस्याः कश्चिद् द्विविषयोऽस्तीति तस्मादुक्तपरिभाषाविषये नायं निषेधः एवं तस्मिन्नि
ति निर्दिष्ट इत्येतद्विषयेऽपि वक्तव्यं स्थानेन्ययहणो न परिभाषाणामनित्यत्वमात्रं ज्ञाप्यत इति नैवं वक्ष्य
माणत्वात् [illegible] न कश्चिद् दोष इति दिक्। परेणानुनासिक इति सूत्राद्वेत्यनुवर्त्तनं त्वाशयेनाह वेति। ह
लोपमांक्ष पेहोन्यतरस्यामित्यतोऽन्यतरस्यामित्यनुवर्त्तितमभिप्रेत्याह लोपः स्यादिति। हल इति
किं शय्यायामासि निः किं आनीरआ धोतोतायमीति। किं मध्ये आ इत्यपि भिन्ना असति लोपारंभे एक
परूपेन स्यादित्यर्थः। दित्यादित्यादित्यपत्युत्तरपदात् ण्य इति आदित्यशब्दो द्वेवतार्थे ण्यः। यस्येति च

तस्तु ५

सि॰स्त्र
५०
50

न

त्यल्लोपे अनेयलोपः॥नचाल्लोपस्यस्थानिवत्त्वंपूर्वत्रासिद्धत्वान्निषेधात्॥महत्त्वमिति॥अल्लोपोनाए
चः॥क्रमादिति॥यथासंख्यसूत्रात्॥एवंचेतिफलाभावादितिशेषः॥वांतो॥यिप्रेनविधिरिनित्यस्यापवादस्तत
यापास्मिन्विधिस्तदादावलग्रहणात्॥इत्यनयानदादिविधिमभिप्रेत्याह॥पकारादावितिः॥औदौतोरितिपूर्व
सूत्रेनयोरेवस्थानित्वेनक्रमभ्वात्॥क्रमकल्पयोः॥क्रमस्येवबलीयस्त्वात्॥गव्यमिति॥मन्वादलोपेन॥
वांतः॥किं॥रैयतीति॥किं॥गोभ्यां॥प्रत्ययेकिं॥गोयानं॥नत्रुगवतिरित्यत्रलोपःशाकल्यस्यहलिसर्वेषा
मितिवालोपस्यादित्याशंक्याह॥वानद्रष्टव्यत्रेति॥प्रक्रियाप्रकाशेतु संज्ञास्वैकत्वाल्लोपःशाकल्यस्येत्यस्यप्र
वृत्तिनविकल्पत्वाद्वालोपोनेतिस्थितं॥धातोः॥एवकारइष्टतोवधारणार्थः॥अन्यथौदिप्रत्ययनिमित्तस्य या॰४
चेद्धातदेशस्तर्हिधातोरेवचेदेवेतिनियमाययतो वा अव्यइत्यत्रमधुनश्चौबाभ्रस्तोन्यादिनाययंजिवांताद
शानस्यात्॥लव्यमिति॥लुनातिरचोयत्॥अवश्यलाव्यमिति॥लुनातेरोरावश्यकेइतिण्यत्॥उभयत्रा राम
पिगुरात्स्वद्धोर्यादितिभिन्नत्वमेचइतिभावः॥उपतइति॥वेत्रर्नंतुसंतानेकर्मणीलट्॥ततोपाकियजादित्वा ५०

रू५१ त्प३

त्संप्रसारणोपरस्य पूर्वत्वे च कृते अच्चन्त्या वैनि दीर्घ आङा सह गुणो ओ यन इत्यो कारो नयकारादि मि
त कइति ओ यमेति तस्मादेव कर्मणि ल्युङ्। संप्रसारणादि पूर्वत्व न तु आङा जादीनामित्यादि आट् अश्च ति ह
त्विः। त्याय्यं ङ्यमिति। शाकि लिङ्गेति कल्पः। ह्रेयं ङेयमिति। अहैमे हल्च अश्वेति कल्पः। कानि संनीति। वाक्य
संस्कारपक्षे गोदा आङ् गुणः। ननु गुणाग्रहणात् व्यर्थ पूर्वपरयोरेको भवतीत्युक्ते उपेंद्र इत्यादा उभयान्तर त
मस्य एकारस्यैव प्रसक्तेः। न चैवं एकारोपि स्यादिति शंक्यं तस्य वृद्धिसंज्ञकत्वेन एच्येव तद्विधानात् उच्य
ते। असति गुणग्रहणे रमेशो गंगोदक इत्यादौ आन्तरतम्यात् अमात्रा वेडो स्यातां असि द्धौ तु गुणसंज्ञायां
तपरत्वात् द्विमात्रयोरेव गुणा पदृशा क्यत्वात् न दोषः। किं च कृष्णर्द्धि रित्यादा उभयान्तर [illegible] तमाभावात्
कारोपि पक्षे प्रसङ्गेन न च कर्त्तरि चर्षिदे वृन्नयो रिति लिंगाभेवमिति वाच्यं। अकारस्यापि पक्षे प्राप्त
न पाश्रायकत्वस्य वक्तुमशक्यत्वात्। पूर्वपरयो रितिः एका पूर्वपरयो रित्युधि हृत्वेनुक्तत्वादयमर्थो
लभ्यते। यत्तु अंनादिव च्चेति ज्ञापकादिति भाव इत्याहुः। तार्थेत्यां असत्यधिकारे अंनादि वत्वेपेतद्धा न्ते५

श्री नी

सि.र.रत्न क्यार्थविरोधासंभवेज्ञापकत्वस्यैवायोगात् अन्यथा एवं प्रकृतनयणादेरेवानादिवज्ञावाधनेचेष्टापत्ति
५१ रपसिद्धान्तापत्तेः शाम्यत्रेत्यादौ मानलङ्गणानुस्वाराघापत्तेश्च न चाग्निमथराहहङ्गाऔदेश विषय
51 कमेवेदं ननु यणादिविषयकेन घाचनेोक्तदूषणावकाशः इति वाच्यं मानाभावात् उभयविषयकत्वसं
भवाच्च । किंचास्मिन्पक्षे षत्वतुकोरसिद्धत्वमित्यनर्थकं प्रसज्येत । न चोभयस्थानिकस्यैवानादि
वृत्त्वं नान्यतरस्थानिकस्य यश्चोभयोर्भयोः स्थाने जायते लभते सोऽन्यतरतो व्यपदेशमिति न्यायात्
इति वाच्यं तादृशानियमे मानाभावात् उक्तन्यायेनैवानादिसूत्रप्रत्याख्यानसंभवाच्च । न चोक्तनिय
मे तुल्यास्येत्यादिनिर्देश एव मानमिति वाच्यं तद्धूतो रेवास्त्वत्विन्न्यायेन तुल्यास्येत्यस्य ज्ञापकतो
पपत्तौ भवदुक्तज्ञापकस्य वैयर्थ्यापत्तेः । नन्वक्तुतुल्यास्येत्येवं तत्रज्ञापकं नावतायेकः पूर्वप
रयोरित्यस्य वैयर्थ्यं न तदवस्थमेवेति चेन्न ज्ञापका अपेणास्तु प्रत्याख्याना नोचित्यात् । एवमति राम
स्वश्ञ्च तराराणामपि प्रत्याख्यानं शक्यत्वाच्चेति दिक् ननु पूर्वपरयोः एथक्कृत्वानित्वे आदेशद्वयं स्या ५१
त्री

दित्याशंक्याह एकश्रुतिरिति एतदर्थ्यमधिकारादेव लब्धमिति भावः। नन्वत्र गुराविल्यत्रैव विशेषणस्यैकत्वस्य पृथगेक
त्ववद्विवक्षितत्वसिद्धावादेक एवादेशो भविष्यतीति किमेकग्रहणेनेति वाच्यं मीमांसकैस्तत्स्यागी
कारे कृतेपि वैय्याकरणैराश्रयितुमशक्यत्वात्। अन्यथाऽचो रहाभ्यां द्वे आदेः धातुकस्येड्वला
देरित्यादावुद्देश्यविशेषणानामच इति रहाभ्यामिति वलादेरित्यादीनामविवक्षापत्त्या सर्वैयर्थ्यकः
नस्यात्। दशापवित्रेणाग्रहं संमार्ष्टीत्यत्रोद्देश्यगतस्येहैकत्वाविवक्षावत्तात्तस्मादिह तन्न्यायानाश्रयणो
एकग्रहणमेवमानमिति ध्येयं। अतएव ग्रहणकशास्त्रेऽप्यप्रत्ययग्रहणमपि सार्थकं। यत्तु वदंति गुणा
नुरोधेन प्रधानत्वेनेत्यायमन्वादेक एवादेशो भविष्यतीत्येकग्रहणान्न्यायप्रसिद्धार्थकथनपरं
रदाभ्यां निष्ठातो नः पूर्वस्य च द इत्यत्र चकाराद्वाक्यभेदेन नकारद्वयविधानान्न दोष इति तन्न सत्।
प्राणिणात् इत्यत्रोभो माभ्यामसस्येत्यनेना विधीयमानो णाकारो द्वयोः स्थाने एक एव स्यात्। न चात्रोभौ ग्र
हणासामर्थ्यान्न दोष इति वाच्यं। असति तस्मिन्नणाकारस्य पपीयेणाश्रवणाप्रसंगात्। इदानीं निशाह्से

सि॰ र॰ स्व वद्दिन्वेद्व्योर्नकारयोः स्थाने णकारो विधीयमानः स्वकस्वस्यादित्यनिष्ठापादकत्वा वैयर्थ्याभावं स्य
५२ ष्टएवानचात्रषष्ठीनिर्द्देशविरहान्नैवमितिवाच्यं न स्यात्तत्र कल्पनीयत्वात् षष्ठीनिर्द्दिष्टस्यादे
52 शाभवतीतिभाष्योक्तेः अतएवनाभिनभंचनभ्रोहनः परस्त्वपि रश्चुवयारशावङ्गत्यादौ षष्ठ्यर्थस्य
तत्रापेन्नगणादित्युक्तभाष्यव्याख्यावसरे हृद्दिस्त्रे कैय्यटेनोक्तं संगच्छते नतस्माद्दुक्तरीत्याएकयहरा
मप्पावरेपकमितिदिक्‌ग्ररराणारतिकिं श्री श्रीः अरीतिकिं सोधातकिः सुधातुरकङ्धेताज्ञि
त्र कङादेशोरयरोमाभूतानतुङः स्थाने ङानतोयोरएसरपरङत्येवं वक्तुमुचितमितिचेन्नतथा
सत्यनंतरतमत्वान्नकोप्यादेशः स्यात्तानचतुर्गाविधिसामर्थ्यांशंकां रमेशाङ्गत्यादौ चारितार्थ्यात् रान
चरपरत्वविधिसामर्थ्यान्ह्लुग्माद्धिरित्यादावकारो भविष्यतीति वाच्यं गीः पूरित्यादौ कृतइत्वातोरुदो
ष्ठ्यपूर्वस्येत्यादिनाविशिष्यविधीयमानयोरिकारोकारयोश्चारितार्थ्यात्तानचङ्गान्तरपरेङत्येव
वक्तव्ये अग्रायहरां हुग्माद्धिरित्यादावकारं आयथिष्यतीति वाच्यं न तथासतिपररराकारेराप्रत्याहा राम ५२

रापत्याकर्त्रर्थमित्यादावपि रपरत्वापत्तेः। न च हलो यमां यमि लोप इति लोपेन निर्वाहः। वैकल्पिकत्वात्। न
च रोरीति नित्यलोपो भविष्यतीति वाच्यम्। इको यणचीत्यत्र यदस्योपस्थानं तद्वै प्यर्थ्यापत्याव हि
रंगत्वेन यणो सिद्धत्वाच्च तत्प्रवृत्तेः। इग्यणः संप्रसारणं यहणो सर्वत्र परे गागोति राद्धांत पिष्यमाणा त्वात्। न ने ३
चाणग्रहणोप्येष दोषः प्रशास्त्रहणामिति लिंगात् तर्हि इग्यणग्रहणोपि तत्स्तुवचां आद्गुणाइत्यादावस्योपस्थि
तेर्गुणाहद्विशब्दानुवृत्त्या प्रियवत् षष्ठ्याः स्थानेन ताद्विधिस्तत्रादौ विवभवत इति फलितमुन्मत्तइन्तावपीतीष्ट च स्वत
न्त्रत मे च विनार्थात्ः स्थानेन भवंति। एवं चानेकाल्त्वात् सर्वादेश[illegible]शकापि नेति चेत् नाप्रनिदारयति
प्रनिधारयतीत्यादावर्थवत्त्वे तो दाधाघ्वदाबिति घुसंज्ञायां प्रणिदापपतीत्यत्र नेर्गद इत्यादि
नाणत्वापत्तेरित्येतत्सर्वमभिप्रेत्य व्याचष्टे रपरः सन्नेवेति। षष्ठी स्थाने योगा स्थानेन्तरतमस्तत्राभ्यां स्थाने
ग्रहणाद्वयमनुवर्त्तते। एकं च प्रथमया विपरिणम्यते स्थानं च प्रसंगइत्युक्तम्। एवं च उः स्थाने प्रसज्य
मानोऽण् रपरो भवतीति वाक्यार्थः संपन्न इति प्राचः॥ वस्तुतस्तु लाघवादेकवाक्यतापास्तु स्थाने ॥

२१ र्व३ भ्र

सिर-ख
५३
53

रूपयोगुणोर परोभवतीवाक्यार्थसंभवाद्वाक्यभेदप्रमाणाभावोदेकुत्स्थानेग्रहणंव्यर्थंउ ग्रुडितिव
द्गितिवक्तव्येपरग्रहणासामर्थ्याच्चेति।एवंचाराराबादेशोभवतइत्यर्थः।नचसर्वादिशनायत्तिः।अकारा कारा
तिरिक्तस्यसमुदायरूपस्यस्थानिनोभावात्तान्नचाङुणाइत्यत्रतदभावेपिकृतइत्थ्यालो रित्यत्रकृदंतस्य
धातोरित्यर्थलाभान्नसत्वमितिवाच्यं।विशेषणविशेष्यभावेकामचाराद्वाधोर्कृकारस्येत्यपिव्याख्याने
बाधकाभावात्तानचैवमुरथधायाश्चेतितद्भुतस्यत्रवेप्यर्थ्यंशक्यंपाश्रगाहिमप्रत्ययेनकृकारेकिशेषि
नेतस्मिन्निनिपरिभाषयाव्यवहितेसत्यप्राप्तेतदपरंभादिनिदिकुशोत्तरतम्यादितिरेफलकाराश्रु
रस्कयोरर्श्रलइत्येतयोरेफलनकाराद्वाराख्यानसाम्यादितिभावः।पेहेहित्वमितिक्लुधेर्धस्येतिभावइतिदी
क्षितिताः।नग्नोजग्धेवकनेदकारस्येत्येववक्तुमुचितत्वान्नचासिद्धत्वेशक्यं।एवंत्रासिद्धीयमद्वित्वइत्यु
क्तेः।लोपोवेति।मयोहोन्यतरस्यामितिसूत्राद्विकल्पानुवृत्तेः।सवर्णोग्निरीति।पथ्यासंख्यनिहन्त्यर्थेसवर्णाम
णीग्रहणमितिभावः।त्रिधमिति।झत्वएवंगत्येत्यर्थः।परोः।मयइत्यनेनयुनर्द्वित्वेचतुर्थधकारमयिनोध्यां। ५३

असंभवतीत्यवते: क्षिप्रष्ठि एजादित्वसंभवात् ३

वृद्धिरेचीत्यस्यैतत्प्राप्तं ह्रस्वैकार्थमिति विष्ठौनन्तु रूपान च परगुणोत्पादिनात न्निषेधः शंक्याः तस्या
नित्यत्वात् तत्र चमानं संज्ञाप्रमाणत्वादिति नि हैशः एत्येधतिएचेत्यनुवर्तनं एत्येधत्योरेव विशेष
णान्न त्वठो संभवादिति प्राञ्चः वस्तुतस्तु परस्परमोहचर्यादेवैजाद्योर्ग्रहणं न त्वेचीत्यनुवर्त्यात्रान्व
यासमासैकदेशेनस्य विशेषणान्वयायोगाद्वाक्यभेदापत्तिरित्यभिप्रेत्य फलितार्थमाह एजाद्योरितीन
च एधते रैजादित्वविशेषणं व्यर्थं व्यभिचारविरहादिति वाच्यं ऊढ़ौ नाद्यडि माभवान्प्रेद्दिधदित्यत्र त
द्व्यभिचारसत्त्वादिति केचित् तन्न वोक्तत्वात् न च नत्वोपधाकस्वाभ्यं वा नित्यत्वेनाधिशब्दस्य द्वित्वेऽप्यु
पधात्वादुस्वाप्राप्तावेजादित्वमहत्वं नमेवेति वाच्यं द्वित्वापेक्षयोपधाकार्यमेव बलीयः इत्योरा
कृदित्करणो न ज्ञापितत्वाक्षोच्छुपभोगइत्याशंक्याह परधायादस्तु पधाकस्वत्वे पश्चाद्विशहस्य
द्वित्वे एजादित्वाभावस्य स्पष्टत्वात् तानुरूपेतीत्यादौ वृद्धिरेचीत्यनेनैव गतार्थत्वाद्यत्थोपपाग्ग
त्याशंक्याह पररूपगुणानि एत्येधत्यारेडि पररूपे ऊठिचाकुरो घाधनपोरपवादः निविवेकः प्रष्ठौहः

भाष्ये तु एत्येधत्योरिति योगं विभज्यै वीति विशोषितम् २

य त्तु प्रेषयतीत्यादा विवक्षेदि धादित्सन्नापि रिाक्षः प्राग्भाग स्पृश धूपत्वेमत्त्येवेत्याशये नातिप्रसङ्गमाहुर्नव्याः। तद्धि न्त्यम्। अन
र्थकत्वेनातिप्रसङ्गाभावात्। भाष्याघाशयस्तु तन्मध्यपतितन्यायेन धातोवयविकस्यार्थवत्तयाप्रतिग्रहणेनग्रहणाद

सि॰र॰स्व इतिप्रष्ठंवहतान्यर्थेऽस्दसिसहः वहश्चेतिणिः। भजोण्विरितिसूत्रान्तदन्तुच्चनेः। ततः प्रसादावाचक्वा।
५८ हेत्त्तुडूत्सूठुसंप्रसारणश्चेतिगुरु वं स्त्यन्त्वेऽनेनवृद्धिःमाभवानिति। नमाङ्योगइतिनिषेधादाडभावः। नुवे
५५ पधाकृस्वन्वहतेनापमेधनिरितिवाच्यम्। एकदेशविकृतन्यायेन तत्त्वनयायातान चस्मानेद्दिर्वच
४ स्व नयन्नेधिशाद्धधिधिशृदृ॥ आदिष्टेवस्नसादाविवप्रकृतिप्रत्ययस्तुग्धन्वाहोषस्तद्वच्छइतिवाच्यं॥द्वि
घ्रयोगोद्दिर्वचनंषाष्ठमिनिराद्दोतयिष्यमाणान्वानाभन्यथाद्हेवणिलोपोनस्यात्। एतेनएच्चा
त्येनेस्वविशेषणानन्वेध तेरव्यभिचारात्सायंनस्पृशद्धांनरत्वादितिधात्तुदृनिस्थ्यप्रत्युक्तं। णिचिचात्तेय्य
धूपतानपायादितिदिक्। अत्ताह हिन्याः सर्वपरयोस्वोर्वृद्धिरेकादेशावकात्यप्त्यर्थः। जुहवितर्केकु
नम्नहः सोस्यास्तीत्यहिनीमत्वर्थीयइतोनांतलक्षणीडीश्रञ्चश्रत्तशद्देनषष्ठीसमासेपूर्वपदात्संज्ञाया
मितिणत्वेपरिमाणविशेषविशिष्टासेनाश्रहौहिणीत्वात्। ईशरिणीयोरितिकाचित्कोऽपपाठः। स्वैरीतिणि राम
न्यतेवृद्ध्यभावायस्तैः। स्वैरिणीइतितुलिंगाविशिष्टपरिभाषयेतिद्रष्टव्यं। केचित्तुङीपःप्रागभागमादये ५८
यत्वन्तारणामूहिनीतिविग्रहउक्तोनव्यैः। तन्न। संज्ञायांणत्वमितिस्वोक्तिविरोधात्॥

तपुसकार्ते स्त्रीलिङ्गिणीवीतिः॥ अतएव तेनैवसिद्धे च्छितिपिउत्त्वत्या
पेर्दहिङ्किदिरसवर्वैप्रय

वतदुपपन्नोपरि भाषासंचारो निष्फलइत्याङ्कः। इरगतौ कंपने च भावे घञ् स्वेनाभिप्रायेण। ईरः स्वैरः कर्व
करणो हृतेति समासः। इह चेरिन्य हरोऽप्रत्याख्यातं भाष्ये स्वैरशब्दान्मत्वर्थीये निनारूपासिद्धेः। स्या
देतत्स्याद्वैपरयोरप्यधिकाराद्विधीयमाना वृद्धिः संहरतिस्यात्। न चाचीत्यधिकारेणो रे रिणोरची
ति व्याख्यानस्य मनोरमायामुक्तत्वात्। किं च उभयत्रत्य हंत तदादि विधौ समस्तिप्रकारान्तस्य स्वशा
ब्दस्य प्रजादेरीरिन् शब्दस्यैवान्यथा पर्यवसानात्पुनरपि दोषस्तदवस्थः। न चादचीत्येतयोरवृत्तिसा
मर्थ्यादैप्यधिकरणापसंबंधाश्रयणान्न दोष इति वाच्यं। वैप्यधिकरण्यपक्षेपि वान्याप्यन्वात्तायेन वि
धित्वस्य तदपवादस्य तस्यापि मिन्विधित्वस्य [illegible] च बाधेऽतिगौरवापत्तेति चेदुच्यते। पदा स्वैरि बाह्या
पह्नौ चेति निर्देशात् स्वैरवैकादेशो न तु वृद्धस्य स्येति सामान्यापेक्षज्ञापनान्न कश्चिद्दोषः। प्रक्रिया
प्रकाशेपीत्थमेवोक्तम्। एतेनाभिप्रवेशस्य तत्रत्यप्रक्रियाहृदयपरापरमनोरमायां ग्रंथः परास्तः। एवं चाक्षौ
भिपर इति यत्प्रचां व्याख्यानं तन्न सम्यगेवेति दिक्। प्रौहः हौठ। अत्रोहशब्दो वार्त्तिकेऽपठितोऽपि तंत्रांतरे १

उपसर्गीत। उपसर्गीत्किम्। प्रगतात्रा ऋच्छकौं अस्यादेशा त। प्रच्छकौं तपरं किम्। उपसर्गकारीयतीति। उपसर्गकीरीयतीत्यत्र वासुपीति विकल्पः स्यादिति। इतिकृतो एवं वदतो स्तूत्रे तपरत्वं व्यर्थमिति ध्वनितम्। तद्भिन्नम्। उपर्त्ते कारीति उप ढलोपे चेबुरकीरतीत्यत्र नित्य वृद्धि निवर्तकतया साफल्यात्। सुवन्तोवयवकेत्वौ माने न वासु . पीत्यस्या प्राप्ते:॥१०

सिकौ
५५
55

त्वादिह प्रवृत्तिमद्भतिप्रक्रियाप्रकाशादावुक्तं। इदानीं ननु माष्यपुस्तके मुहस्यन एवेति त्वनमास
प्रौढ इति। वहप्रापरो। अस्मात् सर्वान्नु प्रत्यये पजादित्वात् संप्रसारणे ओठ त्वधत्वष्टुत्वढलोपदीर्घ
। अर्थवद्ग्रहणा इति। शब्दो नोपस्थितस्यार्थस्य तद्विशेषणात्वसंभवेत्यागायोगादिति भावः। रा
डेः इथगिति। सीरदेवीयमिदं ज्ञापकमिति भावः। नन्वेतदनुपपन्नं फणादिना राडि नासाह
चर्यात् फणादिकस्य आडनेर्वि आहृत्व अन्यस्य तु विभागितिरूपद्वय सिद्ध्यर्थं आजिग्रहणस्याव
श्यकत्वादिति चेत्। अत्र नव्याः। ब्रुवन्ति सूत्रे राडदृष्टिपठित्वापित द्रूपद्वयं स्वसाधं। एकस्य आजते
र्कारस्य प्राणापिदानुं शब्द कृत्वादिति तत् ज्ञापकं समर्थयन्ते। गुरुस्त्वरणा। स्तत्र अनुवेधनिर्देशे शक्ति
पाशयेति निषेधात्। रायष्टि रराडिन्याघसि ध्यापने तन्नैन्याकं कैय्यटस्त स्वरूपमित्यत्र उपस्थितत्वा
दहेप त्वात्रू रूपप रीडदंचस्वानि वस्तूत्रे रागता तथ्य अलिविधत्वे आयजेरं इमित्यत्रोत्तमपुरुषेक राम
वचने इटि सवर्णदीर्घापत्तावानिष्यते रितिभावः। उपसर्गे रातित। उपसर्गाः क्रियायोगइत्युक्तत्वादिति ५५
२ ग्रहेक्ष्मि रूपग्रहणं व्यर्थं स्यदुक्तां परिभाषां ज्ञापयतीत्याह। अन्तादिवच्च। इहएकः पूर्वपरयोरित्यनुवर्तते पथ्या

भावः केचित्तु यक्तिपायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञाइत्युक्तत्वादितिभावइत्याहुस्तद्दसंबद्ध
मितिस्पष्टमेव।वास्तवापि।उपसर्गादादितिचद्वयमप्यनुवर्त्तनेविशेषणेनचतदंतविधिरित्याह।अवर्णांतेत्यादि
।स्तबुधानाविति।स्तबंनावयकइत्यर्थः।प्रार्षेति।ऋषभमात्मनइच्छतीत्यर्थेस्तपत्रात्मनःक्यचिसनाद्यंता
इतिधातुत्वेस्तयोधातुप्रातिपदिकयोरितिस्तयोत्तुकिंक्यचिचेतान्विकल्पजंनालुट्तिपश्शप्स्वरूपेवृद्धौसत्यां
शरोचीतिद्वित्वनिषेधः।एवंप्राल्कारीयतीत्यादावपिज्ञेयं।प्रेजनइति।एजृदीप्तौ।कंपनार्थस्तुपरस्मैपदी।
।एतेनएजृकंपनइतिपठित्वैषिद्वङ्केननादर्त्तव्यमितिभावः।एजोङितेत्यवहितिद्वेयस्यहरामनुनार्थीस्यया
हरांनुव्यर्थीमामिष्टवेशतिवदितिप्रक्रियाप्रकाशकृतः।अवधारयामिति।अनवकाशोयंदाहृष्टःपररूप
स्यगोचरः।एवंरूपविषयोद्धेनियमेयंपदाभवेदित्यभियुक्तोक्तेः।पत्रप्रसादकृतोक्तं।यदाएवशब्दो
व्यापारेणाविष्टनियममाहनदापुरूपंपदाव्यापारविशिष्टनदाहद्धिः।नियोजनंनियोगोव्यापारइतिबु १२
त्पत्तेरिति।तन्नाममेवपूर्वंउज्ज्वलनेशरीरंमयेवजन्मांतरयानकानामित्यादौव्यापारेणाविष्टत्वेनपररूप

ना२ नाव४

सि. र. ब. प्रसंगात्। अत्र न वक्तव्यो नियमाभावेनाव्याप्तेश्च। धातोस्तन्निमित्तस्यैवेत्यादि सौत्रप्रयोगविरोधाच्चेति।
५६ शकंध्वादिविषयत्वं सम्पन्नमपार्थः। शकंध्वादिविषये तस्मिंश्च नुगुणां पररूपं वक्तव्यमित्यर्थः। ज्ञापकसिद्धं
56 चेदं ओयाभ्यांसमर्थाभ्यां कृतं तेभ्य इत्यादि निर्देशात्। न्यासकृता तु ओमाङोश्चेति च कारस्यानुक्तसमुच्चया
र्थत्वाददे लब्धमित्याहुः। तच्चेदं रिति। अत्र प्राचा। आदित्यधिकारादकारान्तस्यैवेदं पररूपमसीमन्
मनस इत्येवमादीनां हलन्तानां पृषोदरादित्वाद्वा लोलोपे प्रश्नादिनेन पररूपमित्याहुः। तदसारं
। अन्त्यलोपार्थं पृषोदरादित्वस्यावश्यकत्वे तत एव पररूपस्याप्युपपत्तौ नेषां शकंध्वादित्वकल्प
नावैयर्थ्यप्रसंगात्। तस्मादेरित्येवमूलोक्तं समीचीनमिति भावः। शकानां देशविशेषाणां मधुः रूप
क कीर्णां राज्ञामंधुः। बदरी वा। नान्तदीर्घान्तः। कुलटेति। कुलस्य अटेति षष्ठीतत्पुरुषः। अटतेः प
चाद्यच्। अभिह्वकीवघकीचोच्यते। मनीषेति। मनसः ईषा। असः पररूपं मनसां नरेस लोपे अकानमा रपम
नस्येति। शिवे यां मनीषितमिति वृद्धिः। सिनेमनसइति परिशिष्टात्साधुतास्यादित्वादिनाचिविहत्वा ५६

षेति। ईषा लांगलदंडः। षष्ठीसमासः। ईषंडंछोऽईषगत्यादिषु आभ्यां उरोश्च हलइत्य प्रत्ययेमूर्ध
न्योपधोः पांयस्कप्रभृशंकरयोरीशः स्त्रियां लांगलदंडके इति रभसकोशात् तालव्योपधः। तत्र आकुले गोह २
शेत्येवा पतंजलिर्भाष्यकारः। पतन्नंजलेंमस्रख्यं सक्तादित्वात् समासः। यतन्नंजलिर्यस्मिन्नमस्कार्य
त्वात् इति वा। मार्त्तंडइति। मृतंडेति पररूपेण ततोऽण्। केचित्तु मार्तंड इति सवर्णादीर्घमाहुः। विश्वो मा
र्तंडो बुडमापस्तु गी। दित्यादि वैदिकप्रयोगात्। मुक्तेदनः। वरणा। मुमशूनमित्यात्[redacted]घपाहड
ष्टव्यमिति। ओत्वोष्ठा। श्रकृतत्वादेकत्रसमासे प्रत्यासत्त्यात्र अकारस्य ओत्वोष्ठयोश्च सत्वेव पररूपं वृक्ते
व्यभिप्रायर्थः तेन बिंबष्लस्तु नोष्ठ ब्रयास्तइन्यत्र बृद्धिरेवमवति। स्थूलोतु रिति। कर्मधारयः। ओमाडोश्च।
अत्रचकारो व्यर्थः। न चैडीन्यनु कर्षणार्थः सः तथा च आ ऋश्यात् स्त्र रूपात् अघार्षर्णात्। कदाशर्ण
दित्यादौ सवर्णदीर्घएवमवतीति वाच्यं। भाष्यकारेणात्र पररूपस्येवांगीकारात्। एवं चात्र घ श्यीत
कदर्श्यादित्येवभवतीति। न चैवमापिमध्येयवादन्यायेन शिवेहीत्यादौ पररूपस्य वृद्धिबाधकत्वेपिक

सि·र·ह्न दर्श्यादित्यादौ सवर्णादीर्घे ऋवर्णरश्रुतिवाच्यं भाष्यमते बाध्यसामान्यचिंतामग्रयणात्॥ मिथ्यास्रुच का
51 रस्य पुनर्विधानार्थत्वान्न दोष इत्याहुः॥ शिवेहीति॥ शिव आ इहीत्यत्र एवं धातूपसर्गयोगादुत्पन्नश्रुतिम
57 ते धातूपसर्गयोरादुणे कृते पश्चात्पररूपं इष्यतां एवं धातुः साधने नेति मते तु अन्तरंगत्वात्सवर्णदी
र्घे कृते आदुणेनैव न तत्सिद्धेरिति भावः॥ अव्यक्तानुकरणस्यात इत्यत्र स्पष्टः शब्दस्तस्यानुकरणात् तदाह ध्वनेरि
ति॥ अकः सवर्णे॥ इको यणचीत्यतो अचीत्यनुवर्तनमित्याह॥ अचीति॥ अकोकीति॥ अत्र केचित्॥ नाऽकृतिश्च
वेत्यादिवार्तिके स्वयमुपन्यस्तेन दध्यृकार इत्यादावतिप्रसंगवारणायाधिकस्य सवर्णग्रहणस्य स्वत्रे
चाकीत्यस्य करणे तिगौरवात् नेत्याहुः॥ अन्ये तु ऋलृवर्णयोः सावर्ण्यमाश्रित्य भाष्ये तद्वार्तिकस्यापि प्र
त्याख्यातत्वान्न किंचिदपि गौरवं॥ तथाहि वार्तिकद्वयविधेयवर्णद्वयस्याप्यत्वसिद्धये वर्णसमाम्ना
ये ऋलृक् सूत्रे न रंपाठः कर्तव्यस्तेन पाथ्यासंख्यं सिद्धं॥ सत्यत्वे दीर्घसंज्ञापि सिद्धा॥ अत एव त्रिमात्रयोः राम
प्लुतसंज्ञापि॥ अन्यथा सानस्यात्॥ एवं च होतृऋकार इत्यत्र द्वयोर्ऋकारयोरेफद्वययुक्तत्वाद्धित्व 51

न्याद्य कदाचिदिदे पदद्वयप्रयुक्तऋकारः कदाचिद्द्वितऋकारश्च भविष्यति। होतृऌकार इत्यत्रापि कदा
चित्‌ऋकारान्तरतमऋकारः कदाचिदृकारान्तरतमोऌद्वयप्रयुक्तऌकारः कदाचिद्द्वितऋकार
श्च भविष्यति। होतृऌकार इत्यादौ इति सूत्रेणैवेष्टसिद्धौ किं वार्त्तिकद्वयेनेति। एवं चाको कि दीर्घ
इत्युक्तेपि न किंचिद्बाधकमित्याह। आद्द्विमात्रमिति। अर्द्धतृतीयमात्रमिति केचिदाहुः। तन्न। भाष्यवि
रोधात्। नन्वित्थं सति वर्णद्वयस्यापि दीर्घसंज्ञासिध्यर्थं वर्णसमाम्नाये पाठः कर्त्तव्य इति भाष्यं संगच्छ
ते। तच्च वर्णद्वयमपि ईषत्स्पृष्टप्रयत्नमिति ऋकारऌकाराभ्यां सावर्ण्याभावात् समाम्नाये
पाठः कर्त्तव्य इति दिक्‌। वस्तुतस्त्विति। एवं च होतृऋकारः होतृऋकारः होतृऌकारः होतृऌकारः होतृऌ
कारश्च होतृऌकार इति षड्रूपाणि भवन्तीति भावः। एङः पदान्तादति सिद्धे सोऽप्येतस्तुत्र स्त्रारम्भा
त्पदान्तत्वे लब्धे ऽन्तरार्थं पदान्तग्रहणमिहैव स्पष्टार्थं कृतमिति भावः। सर्वत्र विभाषा। एतस्मात्सूत्र
पठितानां पशुगुष्पुर इत्यादीनां प्रायेणाच्छन्दोविषयकत्वेन यस्यापि तथात्वं स्यात्तन्निरासार्थं सर्वत्र

सि॰र॰स्व॰
५८
58

हरांकृतं तद्व्याचष्टे लोके वेदे चेति प्रकृतिभाव इति प्रकृत्यान्तःपादमिति सूत्रात् प्रकृत्येत्यनुवृत्तेः। इको गुणवृद्धी इति
सूत्रे नांतःपादमिति पाठस्य भाष्यस्वरससिद्धत्वेऽपि षाष्ठे प्रकृत्येत्यस्यापि प्रसिद्धत्वादिति भावः। नेति। पाठप
क्षे रूपमेवानेन पद्द्वे निषिध्यते। न चैकदेशविकृतन्यायेन चित्रग्वग्रमित्यत्रापि प्रसंगः शंक्यः। एङः पदांता
दिति सूत्रान्मंडूकप्लुत्या एङ इत्यनुवर्त्य ऐङोऽस्य गोरिति व्याख्यानात्। न चैवं हे चित्रगोऽग्रमित्यत्रापि व्या
प्तिरिति वाच्यं प्रतिपदोक्तस्यैव तस्य ग्रहणात्। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति
न्यायात्। न च वर्णग्रहे सा न प्रवर्त्तत इत्यादेश्च गपदेश इत्यत्र ज्ञापयिष्यते। अन्यथा चित्रग्व यमित्यत्र य
रान्स्यादिति वाच्यं वर्णप्राधान्ये तत्प्रवृत्त्यनंगीकारस्य तत्रैव वक्ष्यमाणत्वात्। अवङ् स्फोटायनस्याभि
त्येव सूत्रयितुमुचितमिति केचित्। गवीति। सत्यवङि गवेइति स्यादित्यर्थः। गवाह्न इति। गवामह्नीवेति
विग्रहः। अह्नो दर्शनादित्यर्थः। पुंस्त्व[illegible] लोकान्। इंद्रे चाऽऽरंभसामर्थ्यान्नित्यत्वं लभ्यं सूत्रे नित्यमिति राम
पाठो नाकरः। अथ प्रकृतीति। ननु सर्वत्र विभाषेति प्रकृतिभावस्य प्रक्रांतत्वादसंगतमिदमिति चेन्न। ५८

प्लुतभावी प्रकृत्येति न व्याख्येयम् । लक्षणायां मानाभावात् श्रुश्लोका ३ इतीत्यादावेकादेशे न प्लुतस्य निवृत्त्यप्रसङ्गादिति हर
दत्तइत्याशयेनाह प्लुताश्चेति । द ।

अपंमा गोषष्ठ्याः वः अवङ्स्फोटायनस्यैङ्द्वे चेति सूत्रद्वयं प्रकृतिभावप्रकरणापठितमपि तद्बहिर्भूत
मित्यवरूपं वक्तव्यात्तेभ्यान्तदविधानात् । न च तस्य प्रकृतिभावापवादत्वेनोत्सर्गापवादरूपत्वा
त्प्रकरणस्य तत्स्थत्वे स्तपयादमिति वाच्यं सर्वरूपापवादत्वस्यापि तुल्यत्वात् । एतत्प्रकरणपाठ
स्य गोशब्दान्तत्वाद्यर्थत्वात् । एवं च स्वले ख्य प्रकृत्या मिय प्रकृतिभावप्रकरणात् बहिरत्र सूत्रद्वयं
लिखितं न तु प्रसंगात्सर्वत्र विभाषेति सूत्रमपि तत्रैवेति । प्लुतप्रगृह्याः । इकोपराचीत्यतोचीत्यनुवृत्तौ
वसिद्धौ पुनरच्ग्रहणं प्लुतप्रगृह्ययोर्यस्मिन्नचि परतः संधिः प्राप्तः समेव गृह्णामिती कल्प्यप्रकृति
भावविधानार्थम् । तेन जानु उ अस्य रुजति जानू अस्य रुजतीति सिद्धम् । इहैकदेशस्य परादित्वेन
ग्रहणात्प्रगृह्यत्वे परामावे म प्लवनो वा वेति द्वे बुद्धत्वमुक्तम् । एहि कृष्णेति । हरा३वूहेवेति प्लुतः । हरीइति
इह हे द्विवचनं प्रगृह्यमिति प्रगृह्यत्वान्नित्यमिति किमिति । विभाषेत्यस्याप्रवृत्तिरित्वादेव नित्यत्वप प
ने रिति भावः । इकोसवर्णे । एङः पदान्तादतीति पदान्तादित्यनुवृत्तेन प्रथमयावि परिणाम्यते इत्याह पदा
न्यतः

सि॰ स्तु नाशनीत्यत्रयत्रेति। अत्र संयोगादिलोपो नाऽचः परस्मिन्निति स्थानिवत्वात्तान च र्परर्वत्रासिद्धेन स्था
५९ तिवद्भिमातिनिषेधः शाकपूणतस्य दोषः संयोगादिलोपलत्वरात्वेषि सूक्तत्वात्। कार्यकालपक्षे एक
59 पदाश्रितत्वेनांतरंगसंयोगादिलोपे कर्तव्ये पदद्वयाश्रितत्वेनयरोबहिरंगत्वयाऽसिद्धत्वाच्च
। वाय्वश्वूद्दति। स्तु स्तुपेति समासः पंच संज्ञायामिति समासइति कोस्कभादावुक्तं तन्नेत्यवोचा
मानचस्तुस्तुपेति समासंपाक्षिक इति वक्ष्यमाणत्वात्कथमत्र निषेधः सिन्नित्यसमयोरिति वार्त्तिका मासप
दितिवाच्यं भाष्ये नित्यग्रहणास्यप्रत्याख्यातत्वात्। पाश्वमिति। पश्चीणात्वक्त व्यइति वार्त्तिके न स
मूहेरास्र क्षितिचेति पदसंज्ञायां आर्छदिति गतौ लङ् निपृशः पाघ्राध्मेत्याहि अदेशः। इत न४
श्चेतीकारलोप आडजादीनामित्यादि [illegible] टिन्वाद्वात्तो राघवपवद्दत्वपदांतत्वामिति भावः सप्तक्ष
धीराणामिति दिक्। संख्येसंज्ञायामिति कर्मधारयसमासः। प्रत्यभिवादे आशीर्वचनं प्रत्यभिवादः राम
सप्तम्यर्थोविषयत्वंतदाहाम्बुविषयइति। इति। हरतात्। हृत माद्वानं नपुंसके भावे क्तः। न त्वसंबोध ५९

२४ म२
त३

नमात्रोपलक्षणमेवं चासत्यप्याह्वानेनैतत्संभवतीत्याशयेनाह्वासंबोधन इति । उक्तव्यावर्त्यानस्य फलमु
दाहरति सक्रन्दिन्येति । गुरोरन्ततः । गुरोरगुरोश्चेदृष्टुनार्थे पिशाब्दः । अत्रानन्यग्रहणाद्धिं न्यूनप्रयो
जनानं न चासति तस्मिन्गुरोरितिरेव विशेषणास्यान्नदर्थलाभ इति वा । चोऽपृथग्योगकरणात् । त्वेष्ट
सिद्धेस्त्वेवं कृता । अन्यथा ह्वराद्वेतेगुरोर्नृनतद्वन्याद्येकमेवसूत्रं कुर्यात् । अयेग्रहणात्तु कार्यमेवपु
र्यायन्वलाभार्थः । अन्यथा गुरुस्थानिकप्लुतानामेवपर्यायं तास्याघ्रतुटिस्थानिकप्लुतस्यातस्यसर्व ग५
सूत्रेणाविहितत्वात् । दिति भावः । देवदत्तेति । वाक्यत्वसंपत्तयेऽस्याद्दावेहीत्याद्यर्थमध्याहा
१४ र्यः । एवमन्यत्राष्टशं । ऋ लकृ इत्यत्रलकारोपदेशेननयोः सावर्ण्यादित्यत्वज्ञापनाल्लृ इ प्रशि
खेत्यत्रान्नत इति यत्प्रदासीनेस्वकृते नैवानन्विहैकैकग्रहणाव्यर्थं प्राप्तत्वमेनैव विकल्पसिद्धेः ।
न च पक्षे पाक्षिमन्दयावन्ति गुरुवर्णानि तावन्ता युगपत्तत्स्तुतप्रसंगेन तद्वारणाय एकैकग्रहणा
मिति वाच्यं तेषां तैर्युगपदित्यत्र युगपदग्रहणान्नद्वायकादेकस्मिन्देवदत्तत्वविशेषःप्लुत

स्व

सि॰ र॰ सु॰ द्वयसमावेशायोगात्। न चैकस्मिन्पदे प्लुतद्वयसमावेशायोगेऽपि वाक्यस्येत्यधिकारात्पदांतरेऽतत्समा
६० वेशोपपत्तिरिति वाच्यं। पदस्येत्यधिकारस्यापि सत्त्वात्। अन्यथोत्तरसूत्रेण ष्टुच्युप्रशानित्यादौ
60 नांतस्य पदस्येत्ययमर्थो न लभ्येत। स्पष्टं चैतद्वाक्यस्य टेरिति सूत्रे भाष्ये। तस्मादेकैकग्रहणं व्यर्थ
मेवेत्याशंक्याह। पर्यायार्थमिति। अनुदात्तं प्रश्नांताभिपूजितयोरिति विधीयमानानुदात्तेन प्लुतेन सह
समावेशानिवृत्त्यर्थमित्यर्थः। सर्वः प्लुत इति। न चात्र मानाभावः। सर्वं प्लुतः साहसमनिच्छता विभाषाक
र्तव्येति भाष्यस्यैव तत्त्वात्। अग्नीत्प्रेषणे परस्य चेति सूत्रे भाष्ये चेदं पठितं। साहसंमाशास्त्वत्यागमनिच्छ
ते त्यर्थः। शास्त्रमनुरुध्यानेनायीति पावतः। चिनुहीति। विभाषा पृष्टप्रतिवचने हेरिति प्लुतः।
किमिदं मया चेतव्यमिति पृष्टः सन् प्रतिवक्ति। चिनुहीदमिति। इदंशब्दो वाक्यांतरस्थो न तु चिनुही
त्यनेनैकवाक्यतापन्नः। अन्यथा वाक्यस्य टेरित्यधिकाद्धिशब्देकारस्य प्लुतो न स्यादिति भावः। उभ राम
यत्रेति। इतिशब्दे परतः प्राप्तेऽप्राप्ते इत्यर्थः। भाष्यकृता त्वीयहणं प्रत्याख्याय पवर्गाद्दीपोवशोपमित्यत्रा ६०

पर्वते पर्वे अर्थे इत्यादौ संज्ञासिद्धये तदन्त विधेरावश्यकत्वे हरी विष्णू माले इत्यादौ व्यपदेशिवद्भावान्निर्वाह इति भावः २

पि विकल्प इत्यत्र को ऽस्य दोषः अत्र ईदूदेत् ग्रहणं द्विवचनमित्यस्य विशेषणं तेन न तदन्तविधिरित्याह ईदूदे
देतं द्विवचनमिति संज्ञाविधौ प्रत्ययग्रहणात् तदन्तग्रहणं नास्तीति निषेधात् द्विवचनान्तमीदूदे शोधपत्र
देतं न गृह्यत इति। कुमार्योरगारं कुमार्यगारमित्यत्र नातिप्रसंग इति भावः। ननु मणीवोष्ट्रस्य द्वयम् ३
दंपती वेत्यादिषु कथं संधिः। न च मणीवादीनां प्रतिषेध इति वार्तिकारादिपठितवचनान्न दोष
इति वाच्यं तस्य भाष्ये ऽपठितत्वेन निर्मूलत्वादित्याशयेनाह। मणी वेत्यादाविवार्थ इति। व प्रचे
सि जानीयादिवार्थे तु तदव्ययमिति मेदिनीकोशात्। रोदसी वेत्यादौ वेदरोदसी इवेति पदकाराः
पठंति तत्र छांदसत्वात् समाधेयमिति कैय्यटहरदत्तादयः। अदसः। अत्वमत्वयोरसिद्धत्व
मन्यथा अमू इदं शब्दसंबंधि मकारात्परयोरीदूतोरभावान्निर्विषयमिदं सूत्रं स्यात् तान च य
त्रौत्वमत्वे सिद्धे अरो ऽप्रगृह्यस्येत्यत्र तत्रके ऽपि विकल्पपक्षे इदं सूत्रं चरितार्थमिति वाच्यं तथा सति
तत्रैवादसो मेर्न स्यात् तानन्तकारानुवृत्तिवैयर्थ्यात् स्त्रीनपुंसकयोरदसश्चौङि स्थितेनपदार्थत्वे त्रौ

सि॰ र॰ स्त्र ६१ 61-A

ॐ श्री भावे आङुरो च ह्रूनेतत्त्वमत्व योरसिद्धत्वे प्येहं नत्वात्सर्वै रोष्टसिद्धेरित्याशंक्याह रामहस्मा
विति युस्योकारांतत्वस्यैवावस्थानाद्धितिभावः। एकारोपीति तथाच एकारानन्तु ह्र्तितात्पर्य
याह केमात्य ग्रहणामितिभावः। शेत्तपीस्त्र लुक्व इत्यादिना विहितस्य प्रातिपदोक्तस्य शेइत्यस्य
ग्रहणादिह न हरिशे वभ्रुशइति लोमादित्वान्मौर्थीयशप्रत्यये सप्तम्येकवचने न पांक्वांदसमपी
दंप्रकारणाभ्युव्यर्थमिह पठितामिति भावः। मिश्रात्मत्वे रायोमेरायइत्यत्रत्वेइतिमेइतीत्यनुक
रणास्य लौकिकत्वेन भाषायामपीदंसूत्रमावर्तकमित्याङुः। अस्मेइति। अस्मभ्यामित्यर्थः। भ्य
मः शे आदेशे शेषे लोपः। [illegible] निपाता निपातइति किं त्वकारोवास्तु देवः स्यात्। अद्दद पृश्य
एदंपरपाएकाडितिकिं। प्रेदंव घ्यानचैव मध्यन्दोषएवेति वाच्यं लाघवात् कर्मधारयस्येवा
श्रितत्वात् राबड्डव्रीहोत्तु गौरवमिति वक्ष्यते। न चैवं एकग्रहणं व्यर्थमिति वाच्यम्। असवितस्मिः रामः
न्वर्णग्रहणोन ईतविधावडंतनिपातेनेति व्याप्त्यापन्नेः। नचानाडिति पर्युदासेनेवाज्ञपनिपाते ६१

इहहरी३ इत्यत्रानार्ष इतौ प्लुताश्रये प्रकृतिभावे प्रतिषेधे प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणमिष्टमित्युक्तम्। तथा
वषड्वक्ष्यति। वद्वचनं प्लुतकार्यप्रतिषेधार्थं प्लुतप्रतिषेधे हि प्लुतप्रतिषेधप्रसङ्गः। अन्येनाविहितत्वा[द]दिति। तत्र
प्लुतस्य प्रगृह्यसंज्ञा न प्राप्नोति। ईदूतौ तपरत्वाद् न तत्वारेकारस्य तत्त्वेपि पूर्वत्रासिद्धमित्यसिद्धत्वाच्चेति
वेत्सत्यम्। कार्यकालत्वे सोऽत्सर्गस्यापवादं प्रकरणमिति न्यायेन प्रगृह्यसंज्ञां प्रत्यपि प्लुतप्रगृह्या इत्यत्र प्लु
तग्रहणेनोन सिद्धः प्लुतः स्वरसन्धिविधिविति ज्ञापनात् प्लुतः सिद्ध एवेति तस्य संज्ञा न सिध्यतीति यथोद्देशपक्षे
वाश्रित्यासिद्धः प्लुतस्तस्यासिद्धत्वात् प्रगृह्यत्वं भविष्यतीति भगवान् समादधौ। कैयटश्चाप्यत्र पक्षे शास्त्रासि
द्ध्याश्रयणाच्च प्लुतबुद्धावसत्यां प्रगृह्यत्वे विधीयमाने द्विमात्रविषया बुद्धिः प्रवर्ततेति व्याचख्ये। एतावता
भाष्यकैयटग्रन्थेन स्थानिवद्भावात् प्लुतस्यापि संज्ञासिद्धेति लब्धम्। यत्तु हरदत्तेनोक्तम्। यद्यपि संज्ञा
यामसिद्धः प्लुतस्तथाप्यनुनासिकपर्युदासे सिद्ध एव। ततश्च यस्यानेन संज्ञा कृता द्विमात्रस्य न सोनु
नासिकस्य स्थानी। किं तु त्रिमात्रः। न वस्थानिवद्भावात् तस्यापि प्रगृह्यत्वम्। अनल्विधित्वात्। तदपि य
थोद्देशेपि कथमिवेष्टसिद्धिः। कथं वा ग्रन्थे पुन पूर्वापरविरोध इति। तन्न। संज्ञाविधावीकारादीनामा

अयतोऽपि प्रगृह्यत्वस्य द्विवचनादिसमुदायनिष्ठतया संप्रसारणत्वमिवाल्प्रात्यधर्मत्वाभावात् । अन्यथा दो
१ र्ध्वेरूढेङादीनां कृतात्वानां धातुत्वस्य पवेतेपवेधे इत्यादौ प्रगृह्यत्वद्विवचनत्वयोश्चानापत्तेः । अग्नीवि
ष्णू इत्यादौ तयोरल्धर्मत्वात् । किं बहुनाऽनयोरेवंभूतोऽस्तु तेन स्यामल्विधित्वात् । एकदेशविकृतेष्वल्
विधौ नेति सिद्धान्तात् । किं वपवावित्यादौ एरुरिति तिस्तुरित्यादेशे स्थानिवद्भावात् तिङ्त्वप्रत्ययत्वयोर्ला
भ इति सिद्धान्तो व्याकुप्येत । अत एव षाणान्तेति सूत्रेऽष्टानामित्यत्राल्विकृतेनानन्तत्वाभावात् षट्संज्ञाविर
हान्नुट् न स्यादिति भाष्यं यथोद्देशेऽनुपपन्नमित्यभिप्रेत्य कार्यकालताभिप्रायमित्यपोज्झयत्वे यद इ
ति हलन्तेऽवन्ध्याम इत्यः । एवंभूतेष्वल्विधित्वमस्तीत्येवं परहृत्यः कौस्तुभोऽष्टानामित्यत्र मनोरमायां
[illegible]परास्ता । यदप्यत्र कौस्तुभे हरदत्तोक्तदूषणो[illegible]द्धाराय यद्धिमात्रस्य सुमात्रेणापहृतस्तथा
पि पूर्वत्रासिद्धमिति शास्त्रासिद्धत्वबोधनाद् द्विमात्रेऽपि द्विमात्र एवायमिति बुद्ध्या प्रगृह्यसंज्ञा प्रवर्तते
न त्विह द्विमात्रकृतां संज्ञां स्थानिवद्भावेन त्रिमात्रेऽस्थानयाम इत्ये । येनाल्विधाविति निषेधः शङ्क्येत । न हि रजतभ्रम
प्रयुक्ता प्रवृत्तिः शुक्तिं न गोचरयतीति युक्तम् । एतावानेवं परं विशेषः । रजतभ्रमो नाहार्यः प्रवर्तकः । इ ६१

१

हेतुशास्त्रप्रामाण्यादाहार्यारोपस्तत्स्थानस्यप्रवृत्तावप्रवृत्तौ वा नियामकः। कैयटस्याप्ययमेवार्थ इति नव्याः।
तदपि न। पूर्वत्रासिद्धे नास्ति विप्रतिषेध इत्यादिभाष्यव्याकोपात्। कार्यासिद्धत्वपरप्रक्रियाखण्डनाय प्रवृ-
त्तमनोरमाविरोधाच्च। नहि कार्यासिद्धपक्षे मनोरथः अमू अमी इति च न सिध्येदिति सुवचम्। आहार्यारोप-
स्येहापि सुकरत्वात्। असिद्धपदस्यारोपलक्षकत्वे मानाभावाच्च। न चेहत्यं भाष्यं मानम्। तस्य व्याख्यातत्वात्।
नापीहत्यकैयटतात्पर्यकथनं भावत्कं युक्तम्। षाणान्तेति सूत्रस्थकैयटानुरोधेनेहापि स्थानिवद्भावेनै-
त्व६ व वस्तुतस्त्वप्रगृह्यसिद्धिरित्येव तस्य तात्पर्यात्। यत्तूक्तममुनेत्यत्र सुपि चेति दीर्घो सुरादेश एवदशाद्रीयमिति बु-
द्ध्या प्राप्नोतीति तत्परिहाराय तन्त्राद्याश्रयणेन नाभावे कर्तव्ये कृते च मुभावो नासिद्ध इत्यष्टमे व्याख्यात-
मिति। तदपि न। तादृग्व्याख्यानस्य क्वाप्यभावात्। सत्त्वे वा प्रकृतभाष्यादिनाकृतं न मे जनतः सूत्रे संनिपात-
परिभाषाया च दृकस्यामुनेत्येतद्भाष्यं व्यावर्त्यकारणे न कैयटेन च सह विरोधेन निर्मूलत्वोद्योत्स्यात्। किं चामु-
शब्दे दृशब्दारोपे व्यर्थः। उकारेऽकारमात्रारोपेणापि सिद्धेः। किं चैवं परत्वान्मुत्वे कृते अमु औ अमु ई इति
स्थिते वृद्धिगुणयोः सतोरमौ अमी इत्येव स्यात्। मुशब्द एवदा[illegible]ट इति बुद्ध्या पूर्वपरयोरेकादेशो दकारा।

सि॰ टी॰ ६२ दा२

६२ भावात्सकृत्प्रवृत्तत्वाद्धमुत्त्वस्य पुनरप्रवृत्तेः। तथा वा मूत्रमी अमुया अमुयोरित्यादिर्दृत्तजलाञ्जलिरेवस्या
त्। तस्मोहायीशेषस्सदुष्टत्वान्निर्मूलता। अस्यानिबद्धावेनैव प्लुतस्य प्रगृह्यत्वसिद्धिरित्यवधेयम्। व
६३ स्तुतस्तु समारं द्वन्द्वेन प्लुतस्यापि प्रश्लेषान्न कश्चिद्दोषः। अत्रैवतपरत्वं लिङ्गम्। अन्यथा टस्तुनारीत्या
गुणानामभेदकत्वे स्पष्टार्थमेवेत्यापद्येत। अकुर्वंश्चेत्रेत्यत्र ह्रस्वान्तद्विवचनेनातिव्याप्तिः। तस्य प्रश्ले
षाभावात्। अन्यथा चेद्द्विवचनमित्येव ब्रूयात्। एवं च कार्यकालपक्षेपि प्लुतस्यानुनासिकपर्यु
दासेन काचिदनुपपत्तिः। एकारे त्वजहल्लेन्द्रणा बोध्या। जातिपक्षो वा। न चैवमीदूतोरपीष
२ सिद्धो प्लुतप्रश्लेषो व्यर्थः। प्रयत्नाधिक्ये न विशिष्टव्यक्तिगताकृत्याश्रयणात्ह्रस्वस्येव प्लुतस्या
पि न स्यादिति कैयटोक्तेः। यथा स्थूलां गामानयेत्युक्ते न कृशानयनम्। एकारे तु ह्रस्वाभावान्न
प्रयत्नाधिक्यमिति वैषम्यम्। तत्फलं वाग्नी३ इति हरी३ इ तीत्यादौ यत्तदेव शिवे३ इति गङ्गे३ इती
त्यादावपीति दिक्॥ एकषष्टितमपत्रे निरङ्कपृष्ठे तृतीयपङ्क्तौ शोधपत्रद्वयम्॥ ॥

२

लब्धे निपात एकाजिति पदद्वयं व्यर्थकं परादि भिन्नार्थे वांगीकृतत्वाल्लाघवाच्चेति वाच्यं ओत्त्वे
भाष्यकारैः सज्यप्रतिषेधस्यैवांगीकृतत्वात् ॥ अत्र वृत्तावनाङित्येव वक्तव्ये निपातग्रहणमेका
च्ग्रहणं च कुर्वता प्रसज्यप्रतिषेधस्यैवाभ्युपगमा[illegible]द्भाष्यवृत्तानयोरप्रत्याख्यातत्वाच्च । किंच
गुरुभूतं प्रसज्यप्रतिषेधमंगीकुर्वाणस्य भगवतो भाष्यकृतः सूत्रकृतश्च लघुपमेदोपि संमत
स्तथा हि । इदुतोर्निपातयोरनुकरणे एः ओः आ आङ् अपादाभिविध्योरित्यनेनाव्ययीभावे
इव्ययीभावश्चेति नपुंसकत्वे ह्रस्वो नपुंसक इति ह्रस्वत्वे चाव्ययादाप्सुप इति सुपो लुकि कृ
ते इ इ इदं [illegible] उ उदमित्यत्रैकादेशस्यान्तवद्भावे सत्याङ्ग्रहणेन ग्रहणा[illegible]दनाङिति प्रगृह्य
त्वप्रतिषेधे सन्धिर्भवति इदं उदमिति । पर्युदासे तु नैतत्सिध्येत् एकादेशस्य परादित्वेन ग्र
हणादाङ्भिन्नस्याप्यसत्वात् । निपातसमुदायावा आ इ ए ओ ओ इत्यत्र गुणाद ओः ए ए ओ
इति । तेभ्योऽपि च सन्धिर्न स्यादिष्यते च । एनेन पर्युदासमेवाश्रित्य निपातग्रहणमुत्तरार्थमि

सि॰र॰स्तु तिसमादधानादीहितनाआपि प्रत्युक्ताः इति दिक्॥ आङ्ङ्र्जे इति॥ प्रगृह्यस्यादित्येतदुत्तरमिदं द्रष्ट
६२ व्यं॥ तथा च आङ्र्जेनीयइत्यर्थः एपुंनात्कर्मणि॥ घञ्॥ आङ्जो न भवतीति यावत्॥ एवं चोक्तभाष्य
६२ यासह न विरोध इति भावः॥ आ एवमिति॥ एवंमुपक्रान्तवाक्यार्थस्यान्यथात्वद्योतकोपमका
रः॥ न चैवं एवंमम मे स्थास्यं प्रतिस्वेवं मन्यस इति॥ आ एवं किलेति॥ स्मरणास्य च कोपमाकारः॥ तत्रो
स्सप आकारे रायः स्मतोर्थ एवानिर्दिश्यते॥ एवं किलत दिति॥ ननु ङकारस्य प्रकाप्यश्लेषमाराप्त्वा
त्कार्थं ङिद्धि द्धिवेकदृस्यांशकर्पोहवाक्यमिति॥ नन्दुक्तं भाष्ये॥ ईषदर्थे क्रियायोगमर्यादाभिविधौ च
यः॥ एतमातं ङितं विद्याद्वाक्यस्मरणयोरङि[illegible]हिति॥ तत्र मर्यादाभिविधौ चेत्यत्र समाहारद्वन्द्वे
आगमशासनस्यानित्यत्वानुमभावइति मिश्राः॥ विनातेनेति मर्यादा सहतेनेत्यभिविधिः॥
आ स्मे मेतः आदकोनात्॥ आ हि स्म चादिति एवं दीर्घपाठे प्याकारस्य ङित्वं सिध्यतीति॥ ओतः॥ इह राम
निपातइत्यनुवृत्तमोदित्यनेन विशेष्यत इत्याह॥ ओदंतइति॥ अहो इति॥ अयं सर्वेङौ वे निपतद्दूहपांत ६२
थीनां क्रमेणो दाहरणानि॥ तत्र लाघवादङित्वं हुस्वा॥ एवं तात्पर्यं ननु ङित्वं हुस्वोपिगौरवात् तेनाथ आङ्प इत्यत्रेसम्य
स्वराऊो १ पं हुने ३

त्राधेयघयिपूर्वसूत्रेणैवेदंगतार्थंएषोत्रसात्रएव्वेतिवत्तथापिओत्र्यातमोचिन्त्यस्वायामित्याद्य
र्थमिदमावश्यकं।आतआइत्यत्राङ्नाङोरैकादेशस्यांतवद्भावादाङ्ग्रहणेनग्रहणादनाङि
तिप्रतिषेधस्यात्तायत्तुपर्युदासेनाप्येतत्कृतार्थमित्यूचुस्तन्नापूर्वसूत्रोक्तरीत्याभाष्यस्थत्रलक्ष्यविरो
धात्।चादिषुविशिष्टपाठस्त्वंडत्वमित्तिद्विनीपयेन्नेतुस्सूत्रमावश्यकमितिस्पष्टमेवात्रअन्या
र्थमपीदंपरत्वादोत्र्यातमित्यत्रापिवर्ततइतिदिक्।निपातइतिकिं।भानोऽत्रानचलाह्
णोकत्वान्नदोषइतिवाच्यं।तस्याविशिष्टरूपोपादानस्थलएवप्रवृत्तेरङ्गीकारात्।अन्यथा
ओत्र्यातमितमित्याद्याकारोदाहृतमसंगतंस्यादितिभावः।संबुद्धौ।अनूद्यमानस्यओका
रस्याविशेषणांसंबुद्धाविति।अतोनिमित्तसप्तमीङ्गितिचेतिवृद्धिरित्याहसंबुद्धिनिमित्तकइतिपर
सप्तम्यांतुत्रपोइत्यादिसिध्येत।ऋषिर्वेदस्तदुक्तमृषिरीत्यादौतथाहृष्ट्वादित्याह।अवैदिकइ
ति।संबुद्धौकिं।गविस्यपमाहेतिवृत्तिकृतःप्रत्युदाहृतं।तन्न।प्रगृह्यत्वेसत्यपिबाधकाभावात्।

सि॰ २॰ स्त्र
६३
63

प्लुतप्रगृह्या इति सूत्रे पदांतग्रहणानुवृत्तेरावश्यकत्वात्। अन्यथा इकोऽसवर्णे इत्युत्तरत्र पदांतग्रह
णमनुवर्त्तनीयं स्यात्। करगंधौ नु पपन्न एव स्यात्। अनुकार्यानुकरणयोरभेदविवक्षायामनर्थकत्वे
न प्रातिपदिकत्वाभावे सुबुत्पत्तिविरहात्। अत एव लोपः शाकल्यस्येत्यपि न तस्मादाहोइती
त्येव प्रत्युदाहर्त्तव्यं। इह परत्वाद्दीर्घविकल्पः स्यादिति भावः इति न वाच्यं। विशेषानपेक्षो हि नित्या
दौ विद्यमानस्याल्लक्ष्यपदसंज्ञस्य गोशब्दस्यानुकरणे प्रवृत्तिर्न वदित्यतिदेशेन पदत्वान पायात्
तीर्त्तिकृदुदाहरणासमयोगे वेत्यवधेयं। इतो किं। पटो ऽत्र। अनार्ष इति किं। ब्रह्मबंधवित्यब्रवीत्।
उञः। शाकल्यस्येत्ता वितियदद्वयमनुवर्त्तत इत्याशयेनाह। इतौ वेति। निपात एकाजिति प्राप्ते वि
कल्पोऽयमिति भावः। इह उञ उँ इत्येकमेव सूत्रं योगविभागेन व्याख्यातं। न च योगविभागे फ
लाभावः। तथा सति निपात एकाजित्यनेन नित्यमेव सिद्धं प्रगृह्यभाव स्यात्। उ स्थाने विकल्पेनाम
नर्रुँ इत्यादेशो भवति अयमर्थः संपद्येत तथा च उँ इति उँ इति इत्येवरूपद्वयं स्यात् न तु वितीति। सति योगे ६३

विभागेऽत्र ज्ञ इत्तो विकल्पेन प्रगृह्यसंज्ञायामादेशविकल्पे चोक्तरूपत्रयं सिद्धमिति । इति । विति । अवैदिके इति
शेषः । अनार्ष इत्यनुवृत्तेर्हि नानुक्तत्वात् । प्रगृह्यमित्यप्यनुवर्त्तत इत्याह । प्रगृह्यश्चेति । न च मास्त्वनुवृत्ति-
रादेशमात्रं विकल्प्यतामिति वाच्यं प्रगृह्याप्रगृह्ययोर्द्वयोरप्युञोरादेशप्रसक्तौ प्रगृह्यादेशेनेष्टसिद्धावपि अ-
प्रगृह्यादेशस्य सवर्णोऽनुनासिको वकारः स्यात् । तदनुवृत्तौ तु प्रगृह्यत्वमप्यनेन विधीयत इति नोक्तदोषः
ननु एकेनादेशसंज्ञोभयविधौ वाक्यभेदप्रसङ्ग इति चेन्न प्रगृह्यत्वानुनासिकत्वविशिष्टादेशस्यैकस्यै-
व विधानेनावाक्यभेदात् । अनुनासिक इति । तेन यदेतन्नूँ इति यदेतद्धूँ इतीत्यत्र यरोऽनुनासिक इत्यनु-
नासिकविकल्पः सिद्धः । एतदर्थमेव तत्रानुनासिकग्रहणम् । अन्यथा यरोञमिञस्वासवर्णो इत्येवावक्ष्यत ।
पन्नुपरोञमिञस्वेत्येवावक्ष्यदिति केचित् तन्न । एतन्मुरारित्यस्यासिद्धेरिति गुरुचरणाः । इहापि शाकल्यस्ये-
त्यनुवर्त्तत इत्याह वेति । पदादेर्नानुवर्त्तते तदगुणमात्रस्यानेन नित्यमादेशो ऊँ इतीत्येकमेव रूपं स्यात् ।
अप्रगृह्यमिति प्रथमान्तस्य षष्ठ्यन्तत्वेन विपरिणाममप्यप्रगृह्यस्य ऊञो ऊँ भवतीति मिश्रोक्तरीत्या व्या-

सि.र.स्त येनतद्राजँतिविततीतिद्वेएवरूपेस्मात्वांछइतीतिरूपंनस्यात्तावस्तनस्त विपरिणामेमाना भावाडुक्तरीत्या
६४ एकमेवरूपंप्रसज्येत्तु अनुवृत्तौतुप्रगृह्यत्वविशिष्टादेशस्यविकल्पेनाविहितत्वाद्रूपत्रयंसिध्य
64 तीति भावः। मयउञोवोवा। नन्विदं व्यर्थं यणादेशेनैव गतार्थत्वादित्याशंक्याह। असिद्धत्वादिति। अ
तएवेदंत्रिपार्थापठितमिति भावः। प्रकृतिभावमात्रबाधनं तु नफलं तथात्विड्कोपराचीत्यस्या
नंतरमयउञोवेत्येवब्रूयात्। ईदूतौचाईदूतौ किं। प्रियश्चत्वेप्रियोअत्रभवानि। अविशेषा
त्परस्याः सप्तम्याः स्वौ पा स्वलुगित्यादिना डादेशः सप्तमीति किं। धीतामतीसु छुती। धीत्यामन्येतना
दिप्राप्नेत्याविभक्तेस्तेनैव पूर्वसवर्णदीर्घः। अर्थातरइति। सप्तम्याः श्रूयमाणायायावान्यर्थेवाप्यामध्य
इत्यत्रवाकेवापीप्रकारकसप्तम्यर्थमात्रविशेष्यकः सप्तम्यंतपदेऽवगम्यतेनावानेवनस्यांलुप्ता
यामपिपदावगम्यतेनदाप्रगृह्यसंज्ञामवतिनतुप्रकृतिप्रत्ययार्थोभयप्रकारकोन्तरपदार्थइति राम
विसतीत्यर्थः। एतन्बाजेहत्स्वार्थीइतिममिप्रेत्याकं। जेस्वार्थइतिपहेइस्वेतरपदयोर्वराविवदानर्थी ६४

हत्

१ ३३ पर्युदासोऽयमलकृदुक्तो न पुनः। ग्लकुन्तं हरी इत्यत्र प्लुतस्य न त्वरीत्या ग्रे पेणास्मन्मते स्यानिवद्भावे प्रगृह्यलोपस्याश्रितत्वद्भिन्नत्वस्यापि सत्त्वा
दनुनासिकापत्तेः। तस्मात्प्रसज्यप्रतिषेधोऽयं प्रगृह्यस्य नेति। एतेनानुनासिकपर्युदास इति हरदत्तोक्तिरप्यापाततरमणीयो। अस्मदुक्तप्रश्लेष
पक्षेऽनुसन्दोषाये। त्यवधेयम्।

कथान्न कश्चिद्दोष इति हि कृ। अरो। अप्रगृह्यस्याँवावसानन्नत्यतो वेत्यनुवृत्तिमभिप्रेत्याह। वास्या
दिति। अराः किं। एधते। अजिति वक्तव्ये सामर्थ्यात्तूर्वैरो वरा। कारेरा। प्रत्याहर इतीष्टं सिद्धं॥ ॥
श्रीः ॥इति श्रीसिद्धांतकौमुदीव्याख्याने रामकृष्णभट्टकर्तृकसिद्धांतरत्नाकरेऽच्संधिः समा
प्तः॥ ॥श्रीः॥ स्तोः श्चुना॥ स्तोरिति समाहारद्वंद्वे सौत्रं पुंस्त्वमिति प्राचा। वस्तुतस्तु सकारसहितस्तवर्गः स्तो
तुश्चेति विग्रह। चविंतः। उद्देश्यगतसाहित्याविवक्षायामुभयोस्तुल्यत्वात् श्चुनेति। सहयुक्तेऽप्रधा
न इति तृतीया। पघ्यीह सहार्थयोगो नास्ति तथापि अत एव निर्देशाद्विनापि तद्योगमिति ज्ञाप्यत इ
ति भावः। योग इति। अध्याहारलभ्यमेतत्। इह स्थान्यादेशयोर्यथासंख्यं। निमित्तकार्यिणोस्तु नशा
द्विति लिंगात्। श्चुः शाविति वाच्ये श्चुनेति निर्देशो पञ्चः। यात्रेन्यादावानंतर्यमात्रे श्चुत्वं यथा स्यादित्येवम
र्थं। नव्यास्तु स्तोश्चोश्चुरित्येव न्यासमंगीकृत्य शादिति ज्ञापकान्निर्दिष्टपरिभाषा या नानुपस्थितौ त्यामि तिद्वि२
धायोक्ता व्याप्तिपरिउ कु नत्रा याचनेयाचस इत्यादावतिव्याप्तिः। सर्वस्येत्यंगविकलास्सोपतिष्ठत

सि॰ र॰ ६५ 65 इति चेन्न सिक्तोत्सल्याच्चतरमित्यादौ सौत्रत्वाज्ज्ञातवज्ज्ञापयतीत्यादौ भवत्येवा विश्नः प्रश्न इति। विच्छप्रा
नो प्रच्छ ज्ञीप्सायां यजुपाचयन् विच्छ प्रच्छ रक्षोनङ् इति नङ्। च्छ्वोः शूडिति शः। न च प्रश्न इत्यत्र ग्रहिज्येत्या
दिना संप्रसारणं स्यादिति वाच्यं। अनंतस्यापि प्रश्नाख्यानयोरिति परि प्रश्नेङत मच इत्यादि निर्दे
शेन तदभावज्ञापनात्। न चैवं तस्मादेव ज्ञापकात् श्चुत्वाभावस्याप्युपपत्तौ किं शादिति सूत्रेणेति
वाच्यं। विश्न इत्याद्यर्थं तया नदावश्यकत्वात्। किं चासति सूत्रे निमित्तकार्यिणोर्यथासंख्यापत्तौ रामाश्रि
नोतीत्यादावव्याप्तिः। तस्माद्यथासंख्याभावज्ञापनार्थं क्रियमाणस्य प्रश्न इत्यादौ श्चुत्वनिषेधार्थं प्रवृत्तौ
न किंचित्बाधकं। यत्तु अत्र बाधकान्यपि निपातनानि भवंतीति सूत्राद्बहिष्ठत्वमाशंक्यते निति दर्शनि
षेधोपयोग इति केचिद्वदंति। तच्चिंत्यं बाधकान्येव निपातनानीति सर्वोदिसूत्रभाष्यविरोधात्। किं च प्र
श्न इत्यत्राप्युक्तरीत्या सूत्राद्बहिः संप्रसारणं दुर्वारमिति दिक्। ष्टुना ष्टुः। इहापि कार्यिनिमित्तयोर्यथासंख्यं ना राम
तो ष्णा निलिंगात्। चक्रिरा ठोक सड इति ठो कग नौ सर्पिष्टममिति। ढुल्वान्ना तद्धित इति ष्टुत्वाघस्तवतिरिति ६५

पदान्तस्येति निषेधः। तं प्रति ष्टुत्वस्यासिद्धत्वात्। दो।

स्त्री

समाहारद्वंद्वोयं त्वंलोकात्। अन्येनु षडधिकानवतिरितिशाकपार्थिवत्समासइत्याहुः तन्नासंख्येति
द्वंद्वनिबंधनस्वरासिद्धेरितिप्रकाशकृतः। वस्तुतः नस्त्वसमासभेदेनस्वरभेदइत्याहुरितिवदन्ति। षसम
पिडशमि। एथरूपयद्वं षष्ठीसमासोवानतु कर्मधारयः हि कसंख्येसंज्ञायामितिनियमात्। प्रत्ययेभाषा
यामिति। अत्र प्राचामयटिनित्यमितिपठितं यश्च हलंतप्रकरणेपूर्वसंज्ञायामित्युदाहृतं यच्च प्रमादकृ
तापरोन्तुनासिकइति वा अननुनासिकइति व्याख्यातं। तदेतत्सर्वंभाष्यविराधादुपेक्ष्यं। चिन्मयमिति।
।नित्यंवृद्धशरादिभ्यइत्यत्रनित्यमितियोगविभागात्। ताद्रूप्येमयट्। तेन चिन्मयंब्रह्मेतिसामानाधिकर
ण्यमुपपद्यतेमयट्वैतयोर्भाषायामितिविकारावयवयोर्मयटि तन्नस्यादितिभावः। उदा। तस्मादित्युत्तरस्य
त्यनयापरस्यकार्यंविज्ञायतइत्याहपरयोरिति। अन्तु स्वारस्यपर्यायात्पत्रपरसवर्णाइतिमसत्तमपिसवर्ण
र्णाग्रहणात्। निवृत्तिचे हसं बध्यते। एकदेशस्यैवस्वरितत्वप्रतिज्ञानानेदाहसवर्णाःस्यादिति। उन्यान्नुतंभ
नामिति। भागान्तिनिरन्तौ। एमिप्रतिबंधेपतिघातुपाठपठितः संखुरोधनइतिसूत्रविधौनिर्दिष्टः सोत्रप्राभावेन्तु

१ तदभावेद्वितकारं। अनचिचेतिद्वित्वे तितकारमिस्याहुः। तस्यैस्या
१ हा अत्राघोषस्येत्यादिना अत्र कारिकां। स्कंदेश्छंदस्युपसंख्यानम्।

सि॰र॰ख ह। अत्र प्राञ्चः। सस्य पूर्वसवर्णो न तकारः। सस्य झरो झरीति लोपे एकतकारं। अत्र अश्रोद्भरसुत्कंदे। रोगः इ ९ रोगच ३ ९ स्कंदे कोः गः ३
६६ निनचात्रथकारलोपप्राप्त्यभावात्कथं तसोपइतिवाच्यं। आधे छांदसत्वात्। द्वितीये भाष्ये तथैवोदाहृ
६६ तत्वादिति। झयो हः। तस्मादिस्युत्तरस्य तस्य पतिष्ठते तदाह झयः परस्येति। एचइ अस्वादेशः। उनिलिंगात्झयः इति
